कुंकुमतिलकितभालांकुरविंदछायपाटलदुकूला॥
करुणापयोधिवेलाकाचनचित्तेकरोतु मे लीला॥१॥
पाशांकुशेक्षुचापप्रसवशरस्फुरितकोमलकराब्जं॥
काश्मीरपंकिलांगंकामेशांमनासिकुर्महेसततं॥२॥
तस्यांकभुविनिषण्णां तरुणकदंबप्रसूनकिरणाभां॥
शीतांशुखंडचूडांसीमंतन्यस्तसांद्रसिंदूरां॥३॥
कर्णांपांततरंगितकटाक्षनिष्पंदकंठदग्धरूपां॥कामेश्व
रांकनिलयांकामपिविद्यांपुरातनींकलये॥४॥

Accession No:- ~~7102~~ M1193

Title:- दिक्षाविधी

Author:- ?

Subject:- ?

Date:- ?

पत्रे:- 17

दीक्षाविधिः ३

श्रीगणेशाय नमः॥ ॥अथ दीक्षां प्रवक्ष्यामि देवि संक्षेपतः शृणु॥ वेदा
भ्यासैकनिरतं देवि भक्तिसमन्वितं॥१॥ एवं प्रकारं तं शिष्यं प्रगृह्य हे सुरपुं
गवः॥ कौलदीक्षां गुरुः सम्यक् चतुःस्तंभैर्विराजितं॥२॥ मंडपे वेदिका म
ध्ये भुपुरद्वय वेष्टिते॥ उपक्रम्य ततः कुर्याद्वेदिकायां त्रिरेखया॥३॥ व्री
ह्यादि पंचधान्यं च प्रगृह्य कुलनायिके॥ चतुर्दलं ततः कृत्वा मध्ये बिं
दु समन्वितं॥४॥ तन्मध्ये विक्षिपेत् कुंभान् तत्वादि समलंकृतान्॥ तत्त
न्मंत्रेण मतिमान् पूजयेत् कुलसुंदरी॥५॥ आम्नायपंचकान् देवि पंच कुं

१

भान् विभावयेत्॥ कुंभस्य ईशानभागे तु पंचगव्यं निधापयेत्॥६॥ तत
आग्नेयभागे तु मृत्तिकां कुलनायिके॥ कुंभं च पश्चिमे भागे स्थापये
च्चक्रनायिकां॥७॥ ईशानपूर्वभागे तु कुंडमाहवनीयकं॥ होमकुंड
स्य मध्ये तु द्रव्यवृन्दं विभावयेत्॥८॥ चतुरस्रं च वृत्तं च षट्कोणं चाग्नि
बिंदुकं॥ ध्यात्वा च मूलमंत्रेण देवि भक्तिसमन्वितः॥९॥ दूर्वा च वटप
त्रं च गुडूची सोमवल्लिका॥ औदुंबरं तथा देवि समिदाद्याहुतिस्तथा॥१०॥
तत्पश्चाद्गुरुमंत्रेण पायसान्नं घृतं तथा॥ अष्टाविंशति हुत्वा च देवी

(२)

श्रद्धासमन्वितः ॥११॥ ततः शिष्यं स[illegible]हूय कलान्यासेन शोधयेत् ॥
पंचामृत्तिकया स्नानं भस्मोद्धूलनपूर्वकं ॥१२॥ स्नापयेत् पंचगव्यं च
सद्योजातेन मंत्रितं ॥ ततः कृत्वा सुवस्त्रेण आत्मतत्वेन देशिकः ॥१३॥
दृष्टिबंधं प्रकुर्वीत यथावत्कुलनायिके ॥ गुरोर्दक्षिणभागे तु शि
ष्यः स्वस्थसमाधिकृत् ॥१४॥ पंचगव्यं ततो दद्याद्विद्यातत्वेन देशि
कः ॥ स्नापयित्वा ततः शिष्यं पश्चाद्दीक्षां प्रवर्त्तयेत् ॥१५॥ दृष्टि
बंधं विसृज्याथ प्रणमेद्गुरुपुंगवं ॥ ततो गुरुः प्रसन्नात्मा आसनता

दिकलां न्यसेत् ॥१६॥ आत्मासने स्थितं शिष्यं शिवतत्वेन शोधयेत् ॥
तत्पश्चात्कुलदेवेशि कल्पयेद्गुरुपुंगवः ॥१७॥ द्वादशार्धं च मातंगी गु
रून् विघ्नेशमेव च ॥ पीठत्रयं ततः पश्चात् दुर्पादित्रय यथाक्रमं ॥१८॥ अभि
षेकं ततः कुर्यादेतैर्मंत्रैरनुक्रमात् ॥ अष्टांगयोगनिरतः गुरुर्दीक्षां
प्रवर्तयेत् ॥१९॥ श्रीदीक्षामंडपद्वारे आस्थितं स्वस्थमानसं ॥ आगच्छ
पुत्रपुत्रेति आहूयाद्गुरुपुंगवः ॥२०॥ रहस्यं श्रृणु पुत्र त्वं न कस्यापि प्र
काशयेत् ॥ कुलमार्गेषु सर्वेषु कुलनिष्ठाप्रवर्तके ॥ २१॥ तत्पश्चात्कु

२

लयोगीन्द्रो शिष्याद्गुरुमथाब्रवीत्॥ हे स्वामिन्सर्व धर्मज्ञस्त्व मामां न
विचारयेत्॥ २२॥ चित्तकाम्यप्रदं मार्गं देहि मे गुरुपुंगव॥ श्रुत्वा ततो
गुरुर्देवि स्वं विद्यामंत्रं प्रकाशयेत्॥ २३॥ तस्य श्वासशुद्धविद्यां च दर्शये
द्गुरुपुंगवः॥ बालापद्धतिमभ्यर्च्य बालामंत्रं प्रदापयेत्॥ २४॥ सर्वे कुं
भं समुद्धृत्य अभिषेकं प्रकल्पयेत्॥ स्नानकाले स्मरेद्देवीं शिष्यो ध्या
येद्गुरुं प्रभुं॥ २५॥ ततः प्रसन्नशिष्याय शुभ्रवस्त्रं प्रगृह्य च॥ ऊर्ध्व
पुंड्रं त्रिपुंड्रं वा धारयेत्कुलसुंदरी॥ २६॥ ततः शिष्यस्त्र हृदये गुरुं ध्यात्वा

२

प्रवेशयेत्॥ गुरुः प्रसन्नस्तं शिष्यं आकृष्याद्गुरुपुंगवः॥ २७॥ सौभा
ग्यं वाच्य वगलां वाराही च ततः परं॥ आपदुद्धारकं देवि प्रदद्यात्त्वत्र
नायिके॥ २८॥ श्रीतिरस्करिणीं कुर्यात्पश्चात्तत्त्वत्रयं प्रिये॥ श्रीविद्या
मंत्रखंडेन बालाखंडत्रयेण च॥ २९॥ श्रीशिवादिष्टपिव्यांतं आदि
क्षांताक्षरैर्युतं॥ गुरुर्मंत्रादितत्वं च देयं शिष्याय देशिकः॥ ३०॥ यांम्प
कुंभं समाहृत्य शिष्यं तेनाभिषेचयेत्॥ ततो गुरुः प्रसन्नात्मा दीक्ष
येत्सश्रिमंत्रिवे॥ ३१॥ ततः कुंभस्य वस्त्रेण दृष्टिबंधं प्रकल्पयेत्॥ प्रा

स्पर्शेच्छं रवती येन तं शिष्यं स्वस्थमानसं ॥२२॥ शिष्यस्य दक्षिणे कर्णे उपदेशं यथाविधि ॥ लोपामुद्रा महादेवी पश्चाद्बाल्ली भुवनेश्वरी ॥२३॥ अन्नपूर्णां ततः पश्चात्ततः कामकलामपि ॥ मंडल त्रयमंत्रेच दत्वा वा रास्ततः परं ॥२४॥ चतुःषष्टि महादेवी प्रदद्याद्गुरुपुंगवः ॥ ततो गुरुः प्रसन्नात्मा दृष्टि बंधं विसर्जयेत् ॥२५॥ पश्चिमं कुंभमादाय शिष्यं तेनाभिषेचयेत् ॥ चक्रस्य पुरतो देवि दद्याद्विचक्षणः ॥२६॥ चक्रराजं समभ्यर्च्य बटुकस्य बलिं प्रिये ॥ कृत्वा तत्रैव तत्रायनं त्रात्स्या सह

निशां नयेत् ॥२७॥ ब्राह्मे मुहूर्ते चोत्थाय कुले शी गुरुपुंगवः ॥ सायं संध्यां ततः कृत्वा यागशालां प्रवेशयेत् ॥२८॥ तालागुरु मुखवादे विचित्रि दंबर संहितं ॥ ततः श्रीचक्रमभ्यर्च्य कृत्वा चाहुतिमेव च ॥२९॥ आदूय शिष्यं कृपया धारिणं गुप्तव स्त्रकं ॥ पंचवर्णानि यैं स्त्रैः पंच बाणादि मंत्रितैः ॥४०॥ धृत्वा वामकरे देवी यथावद्गुरुपुंगवः ॥ दक्षकर्णे तुरीयां च महाह्वां च कुलेश्वरी ॥४१॥ आश्वारूढां च मिश्रां बादेवी वाग्वादिनीमपि ॥ शिष्यस्यैव तु भो त्वं नान्यथा पतितो भवेत् ॥४२॥ मुद्राणां न

वक्त्रं चैव सिद्धानां सिध्युनं चैव ॥ वीरावलीं महादेवी दर्शयेद्गुरुपुंगवः ॥
॥ ४३ ॥ पंच मुद्रां च देवेशि दर्शयेत्कुलनायिके ॥ ततः शिष्यो गुरुरूपां
संप्रार्थ्य स्वच्छमानसः ॥ ४४ ॥ साष्टांगं प्रणमेद्देवी गुरुं परमधार्मि
कं ॥ तत्र स्कुंभमाहृत्य सेचयेत्कुलनायिके ॥ ४५ ॥ देहपाशनिवृत्त्य
र्थं शिष्ये क्षिपेच्छं खवारिणा ॥ पश्चाद्गुरुः प्रसन्नात्मा स्मरेत्सद्धर्ममंबि
के ॥ ४६ ॥ इत्यंतानीत्ततीयं च स्वासने स्वयं मंत्रवित् ॥ प्रासादमनुना
देवि दद्याच्छिष्याय स्वयं गुरुः ॥ ४७ ॥ स्थापयित्वा ततो वलं चैकीभावं विचिं

तयेत् ॥ एवं कृत्वा विधानेन स्वतः ऊर्ध्वं प्रवेशयेत् ॥ ४८ ॥ सच्छिष्यो गुरु
रूजार्थं गंधपुष्पं प्रगृह्य च ॥ पूजयेत्कुलयोगीशो श्रीगुरोः पादुका
ततः ॥ ४९ ॥ पुष्पद्वयं समाहृत्य पुण्यपापात्मकं स्वकं ॥ संतर्प्य गुरुपादा
ग्रे साष्टांगं प्रणमेद्गुरुं ॥ ५० ॥ तं शिष्यं स्वांगवतीर्थेन मोक्षयेदात्मशुद्धये ॥
शिवादिस्वात्मपर्यंतं दर्शयित्वा गुरुः प्रिये ॥ ५१ ॥ श्रीपात्रं प्रगृहीत्वा श्री
प्रसादं पराम्नु ॥ उपदिश्य गुरुः सम्यक् पूजयेच्छ कुलनायिके ॥ ५२ ॥ शि
ष्याय गुरुणा देयं परामंत्र कुलेश्वरी ॥ परां ज्ञां प्रव मंत्रं च उपदिश्य प्रा

५

क्रमं ॥५३॥ मालिनी मंडलांचैव देवानांतु पुरोहितं ॥ भगिनीयो सुतां
चात्र त्रिभिः त्रिशिष्ये विराजिता ॥५४॥ मालिनी मंडलांतं च दत्त्वा पित्रा गु
रुं प्रिये ॥ ऊर्ध्वकुंभं समादद्यात्सर्वाम्नायपरिवृतं ॥५५॥ सिंचयेत्तेन दे
वेशि गुरुं परमधार्मिकं ॥ पश्चात्तं नामकरणं कुलानिर्वाणमारभेत् ॥५६॥
कुलाष्टकेषु संभूतान्स्वरूपानानयामहे ॥ यथावन्मूलमंत्रमिति धारयेत् मु
क्तैः मग्न ह्लच ॥५७॥ श्रीपात्रेतु कुलेशानि निक्षिपेत्तेन तर्पयेत् ॥ त्रिशिष्य
माद्यपदीक्षार्थं यथावन्नियतां गुरुः ॥५८॥ बल्युद्वासनकालेतु नुछि

ष्टं देवि दीयतां ॥ श्रीपात्रे बिंदुमुद्धृत्य स्थालपात्रे तु पूरयेत् ॥५९॥ पू
र्णाभिषेकसिद्ध्यर्थं दीपेन सह दीयतां ॥ ॥इति श्रीपरानंदतंत्रे स
पादलक्षग्रंथे मंत्रखंडे द्वितीयपादे आम्नायदीक्षाविधिक्रमो नाम
पंचदशोध्यायः ॥१५॥ ॥ अथ वक्ष्ये विशेषेण पूर्णदीक्षाविधिं शृ
णु ॥ पूर्णदीक्षा करोदेवि दुर्लभो गुरुपुंगवः ॥१॥ अहमेव कुलेशानि
गुरुरूपं समाश्रितः ॥ षोडशाव्यदीक्षाभिः रतः परमधार्मिकः ॥२॥
त्यक्त्वा कर्मफलासक्तिं कुंडली ध्यानमास्थितः ॥ चक्रस्य वामभागे तु

दक्षिणेप्यकवेदिकां ॥ ३ ॥ वेदिकासु परानंदे बालाचक्रं विभावयेत् ॥
नदीजलं समाहृत्य स्थापयेत्कुंभपंचकं ॥ ४ ॥ पंचद्रव्यं महादेवि वृंद
नं चापि मे [illegible] येत् ॥ स्थापयित्वा ततः कुर्याद्यथावन्मंत्रपूर्वकं ॥ ५ ॥
दक्षिणेन तु रेखायां आं [illegible] षट्कं लिखेत्प्रिये ॥ रेखांते द्रव्यचक्रं च
तास्वरं देवि रूपकं ॥ ६ ॥ कुंडली कुंभमादौ च स्थापयेद्वृंदकारणं ॥
एकैकं कुंभमाहृत्य रेखांतः स्थापयेत्पृथक् ॥ ७ ॥ रेखाद्वयं च वे
ष्टव्यं अग्निमंडलमावृतं ॥ आद्यंतयोर्महादेवि षट् स्थानं च वि

भावयेत् ॥ ८ ॥ आदौ त्रिकोणमध्ये तु कोटिसूर्यसमप्रभं ॥ क
वली कृतलोकं च भावयेद्देवि रूपकं ॥ ९ ॥ रेखात्रयं पुनर्भित्वा वै
श्वानरसमुद्भवं ॥ आक्रान्त्वा मणिपीठं च तमांगारसमप्रभं ॥ १० ॥
ग्रंथिभेदं च तत्रैव मंडलद्वयमध्यगं ॥ प्रविश्य तत्र वदाहे विकुला
गमविशारदः ॥ ११ ॥ एवं क्रमेण मतिमान्षडाधारविनिर्णयं ॥ ज्ञा
त्वा गुरुमुखाद्देवि साधयेद्ग्रंथिभेदनं ॥ १२ ॥ आत्मपात्रे स्थितं द्रव्यं
बिंदुमुद्धृत्य त्रिद्विना ॥ हृज्जयेत्कुलयोगीन्द्रो मूलाधारस्थितावलं ॥ १३

समवारंजपेत्सम्यग्गुरुमंत्रंचपादुकं॥ भोगं चशक्तिपात्रंच बलि
पात्रंततः परं॥१४॥ शंखोदकेन देवेशि विशुद्धिः स्वपेत्क्रमात्॥ गु
रुपात्रेस्थितं द्रव्यं स्नात्वा मंडपमभ्यगात्॥१५॥ स्वस्थपेत्कुलयोगीन्द्रो
निश्चांतं मंत्रमुच्चरेत्॥ गुरुत्रयाणां मंत्रंच स्मरेत्साधकपुंगवः॥१६॥
विशुद्धिमंडपात्पूर्वं चतुराम्नायमंत्रकैः॥ चतुरंकेलश्वान्तदेवि
प्रजपेत्स्वपृथक्पृथक्॥१७॥ सौभाग्यवल्लरीप्रोक्तं प्रजपेत्स्वक्र
मंबिके॥ चक्रस्य पूर्वभागेतु षट्कोणंच ततः परं॥१८॥ पश्चिमेचो

त्तरे देवि कामगिर्यंत्रिपूजयेत्॥ तेषां यंत्रक्रमेणैव प्रजपेत्सूर्व
मादितः॥१९॥ मध्यकुंभे महादेवि मध्यमादि समर्पितं॥ कुलकुं
भमिति प्रोक्ता श्रीपात्रामृतपूरितं॥२०॥ अस्याभिषेकं ज्ञस्यास्ति
कौलिकस्य न चान्यथा॥ ऊर्ध्वाम्नायस्थितान्मंत्रान्मध्यकुंभे
जपेद्गुरुः॥२१॥ एवं लला विधानेन चक्रप्रजापुरः सरं॥ श्रीमार्या
बिकासमायुक्तो गुरुः परमधार्मिकः॥२२॥ षट्कोणमंडले स्थाप्य
कलात्रावाहनंप्रिये॥ ज्ञात्वा गुरुमुखाद्देवि चिच्छिदंबरसंज्ञिकां॥२३॥

पा२

आकृष्य शिष्यं कृपया गुरुः पादाब्जधारिणं ॥ भूमौ चक्रं लिखित्वा
थ ध्यात्वा वा पूजयेद्गुरुः ॥२४॥ तस्य दक्षिणभागे तु शिष्यं संस्था
प्य देशिकं ॥ आरवतीर्थेन संप्रोक्ष्य गोमुखासनमास्थितं ॥२५॥ त
स्य चक्रस्य मध्ये तु पेका शक्तिं विनिक्षिपेत् ॥ गंधपुष्पाक्षतैर्दे
वि पूजयित्वा विधानतः ॥२६॥ शक्तिपात्रं गृहीत्वा तु मूर्ध्नि तस्य
शेखरयेत् ॥ तस्याः शिरसि देवि त्रिमातंगी चक्रमावहेत् ॥२७॥
बाला चक्रं कुचे पश्चाद्गुह्ये त्रिपुरमावहेत् ॥ तत्तदावरणोपेतं

१

च ध्यात्वा सुभक्तितः ॥२८॥ पूजयेद्विधिनानेन आत्मपात्रेण दे
शिकः ॥ जीवनोद्भवसंयुक्तं मुखे संपूरयेद्गुरुः ॥२९॥ शक्तिशेषं ग्र
हीत्वाथ मुखे शिष्यस्य चार्पयेत् ॥ ततः पवीवरणं देयं अन्यथा नि
रयं व्रजेत् ॥३०॥ पूर्ववदुत्तरपर्यंतं कृत्वा शिष्यमुखाद्गुरुः ॥ अग्नि
कर्मविधानेन होमं कृत्वाथ पूर्ववत् ॥३१॥ पूजा चक्रस्य वामस्था
मनुकल्पान्देवि संस्पृशेत् ॥ अष्टवारं जपेत्पश्चात् श्रीप्रसाद परा म
नुं ॥३२॥ अभिषेकमयुक्तस्य शिष्यं गोमुखसुस्थितं ॥ पूर्वादिमध्य

10

पर्यंतं कलशान् अमन्त्रा: प्रिये ॥ ३३ ॥ सशिष्यश्चार्घमेवाथ पुष्पत्रव
स्त्रं प्रगृह्य च ॥ गंधपुष्पाक्षतैर्देवि मंडलं च प्रकल्पयेत् ॥ ३४ ॥ ब
लिं हस्तपुटे धृत्वा मंडपद्वारमास्थित: ॥ श्रीगुरुं हृदये देवं चंद्रार्धकृ
तशेखर: ॥ ३५ ॥ श्रीदेविकासमायुक्तं चिंतकामासदं प्रिये ॥ आनन्द
चेतोयुक्त: सन् पुलकांकितविग्रह: ॥ ३६ ॥ ध्यानं कुर्यान्महादेवि श्री

१०

सदाशिवरूपिणीं ॥ नवदूतीमहामंत्रं सहस्रादिप्रभेदत: ॥ ३७ ॥ भग
मालिनिमंत्रं च जप्त्वा ध्यानसमाहित: ॥ पुष्पद्वयं गृहीत्वाथ भगमध्ये

समर्पयेत् ॥ ३८ ॥ यौवनांतं कुलेशानि तस्याद्रव्यं प्रदीयतां ॥ अपूप
पायसाद्यैश्च विविधैर्व्यंजनैर्विवर्जितं ॥ ३९ ॥ यथाशक्ति विनीतात्मा नि
र्वेदिनं संप्रपूजयेत् ॥ भोगकाले शिवं सोपि ध्यात्वा देवीस्मरातुर: ॥ ४० ॥
चक्रानंदं हृदि ध्यात्वा मिश्रं तत्र प्रगृह्य च ॥ पूजयेद्यजमान्येन सुभगो
द्यत: क्रमात् ॥ ४१ ॥ श्रीमाज: प्रहारं तत्रैव प्रभूति कालप्रकीर्तित: ॥
पंचसारविधिं ज्ञात्वा पशुमांसेन तर्पयेत् ॥ ४२ ॥ इति पूजां परित्यज्य
य: करोत्यजसंहति: ॥ स पापी परमेशानि निरयं यात्यधोगतिं ॥ ४३ ॥

तस्मात्सर्वप्रयत्नेन दूतीपूजां समाचरेत् ॥ ज्ञात्वा गुरुमुखाद्देवि पश्चा
द्बंध विधिक्रमं ॥४४॥ चक्रपूजां प्रकुर्वीत सयोगीवीरसंगतिं ॥ ततो
गुरुं प्रसंन्नात्मा आहूय शिष्यमंबिके ॥४५॥ सन्निधाप्य गुरुपादाब्जे
पूजां कृत्वा विधानतः ॥ पंचमुद्रा नमस्कारं साष्टांगं प्रणमेद्गुरुं ॥४६॥
कृत्वा हृदि गुरुं ध्यात्वा गोमुखासनमाविशेत् ॥ इति पूजाक्रमेणैव
नमोंतं च प्रपूजयेत् ॥४७॥ इति नामानि देवेन्द्रि कथितानि मया
पुरा ॥ पश्चादाम्नायवर्त्तिनी पूजयित्वा निधानतः ॥४८॥ पंचांबा

११

मूलमंत्रं च इति मंत्रपुरःसरं ॥ सौवर्णे रौप्यपत्रे वा तालपत्रेथवा गुरुः
॥४९॥ लिखित्वा दीयतां तस्य जपनाम्ना मया प्रिये ॥ दद्यात्काष्ठं च गंडू
षं मुखप्रक्षालनं तथा ॥५०॥ दत्वा गुरुस्ततो देवि षोडशाक्षरसंज्ञिकं ॥
परा प्रासादमंत्रं च गत्वा पात्रं प्रदीयतां ॥५१॥ ततः परं महादेवि व
क्ष्ये कालविधिं शृणु ॥ षोढान्यासं न्यसेत्पश्चात् क्रमान्न्यासं तमेव
च ॥५२॥ त्र्योदशीमहान्यासं गणेशादि महन्न्यसेत् ॥ गंधपुष्पसमा
युक्तो महासंध्यां प्रकल्पयेत् ॥५३॥ महार्घ्यं सर्षपोपेतं शिष्यहस्ते

प्रदीयतां॥ आधारं कुंभमुध्दृत्य संकल्पेन प्रकल्पयेत्॥५४॥ जपे
त्तानि मंत्रं हि किमन्यं तत्क्रमेण वै॥ तत्तत्कुंभंसमुध्दृत्य तत्तन्मंत्रेण दे
शिकः॥५५॥ षट्कुंभेषु च तां तेषु षडध्वानं च दीयतां॥ दद्याच्चिंतारसहि
तं शिवबीजेन संयुतं॥५६॥ वाग्बीजेन पदध्वानं कामजेन च वर्ण
कं॥ परया च कलाध्वानं योनिबीजेन मंत्रकं॥५७॥ लक्ष्मीबीजेन
तत्पश्चाद्भुवनं विबुधप्रिये॥ ताराख्यं मुखात्सर्वं षडध्वानं सम
र्पयेत्॥५८॥ एवं क्रमेण मतिमान् उपदिश्य यथाक्रमं॥ कामगिर्या

12

दिपीठस्थान्कुंभान् संगृह्य देशिकः॥५९॥ श्रीचक्रकुंभं संत्यज्य त
त्तन्मंत्रैः प्रसेचयेत्॥ तद्वापि कुंभानुध्दृत्य श्रीचक्रे स्थापयेत्ततः॥६०॥
श्रीचक्रकुंभं संत्यज्य तत्तन्मंत्रैः प्रसेचयेत्॥ तद्वापि कुंभानुध्दृत्य श्री
चक्रे स्थापयेत्ततः॥६०॥ श्रीचक्रकुंभं देवेशि तेजोरूपं विचिंतयेत्॥
विशुद्धिमंडपे शिष्यं समारोप्य सुसन्मुखं॥६१॥ कालसंकर्षणीवि
द्यादला शिष्यमुखे पुनः॥ त्वां स्वतीर्थेन संप्रोक्ष्य श्रीचक्रं स्थापये
त्क्रमात्॥६२॥ गुरुपादे शिष्यः पश्चात्पादोपरि बलिमर्पयेत्॥ ततो

गुरुं महादेवि संस्तोष्य शिष्यमुच्चरेत्॥६३॥ अनेकजन्मसंसिद्ध

पुण्यपुंजीवशात् छिन्नो:॥ दृष्टवानस्मि मां शंभुं साक्षात् श्रीगुरुरूपिणं॥

६४॥ हे स्वामिन् परमेशानं कृपया मां निरीक्षय॥ इत्युक्त्वा तु शि

ष्यः पश्चात् मंडपे स्वस्थमानसः॥६५॥ आर्द्रज्वलति मंत्रेण गुरु

पादाज्जलं पिबेत्॥ पादुकामंत्रसहितं पादुकां तस्य चार्पयेत्॥६६॥

कुलदीपेन सहितं प्रकाशाविमर्शौ द्विगुरुः॥ पदद्वयं कुलेशानि दक्ष

कर्णेऽनुसंजपेत्॥६७॥ पादुकां मूर्ध्नि शिष्यस्य चिंतयेत्सादरेण शिवं॥

12

श्रीचक्रकुंभमुद्धृत्य अभिषेकं प्रकल्पयेत्॥६८॥ सहृदीपं समागत

ह्य कामिनी करपल्लवात्॥ कुलदीपेन सहितं देव्यग्रे तु प्रदर्शयेत्॥

॥६९॥ आंतस्तेजो बहिश्चोल्कातत: शिष्यस्य दर्शयेत्॥ पूर्णपात्रं करे

धृत्वा पूर्णाहंतात्मकं शिवं॥७०॥ अनुत्तरं महामंत्रं नित्यानंदपरा

त्परं॥ नादबिंदुकलातीतं नादातीत: स्वरूपकं॥७१॥ निर्गुणं परमं

नित्यं पूर्णपात्रे जपेदिदं॥ हिरण्यपात्रं मधो: पूर्णमिति समुच्चरेत्॥

अनुत्तरं महामंत्रं द्रव्येण सह दर्शयेत्॥७२॥ पूर्णांतं तस्य पात्रं तु द

त्वापात्रं प्रकल्पयेत्॥ पूर्णदीक्षाक्रमेणानि नियंतां प्राप्नुयात्स्तः॥
७३॥ आवयोः परमाकारं प्रविशंति जनोत्तमाः॥ विनागुरुं तु स्वादे
षां यावदाभूत संप्लवं॥ ७४॥ असिपत्रवने घोरे यांति ते नात्र संश
यः॥ पूर्णाभिषेकहीनो यः कौलिको म्रियते यदि॥ ७५॥ सोपि तद्
तिमाप्नोति नात्र कार्या विचारणा॥ तस्मात्सर्वप्रयत्नेन पूर्णदीक्षां
प्रवेशयेत्॥ ७६॥ पुत्रमित्रकलत्राणि गुरवे नाभिचार्पयेत्॥ कृ
तार्थोहं कृतार्थोहं कृतार्थोहं कुलोत्तम॥ ७७॥ धन्योस्म्यनुगृही

तोस्मि पूतोहमिति भावयेत्॥ शिष्यस्तदीप्सितार्थश्चैव हुं पले
नतोषयेत्॥ ७८॥ सर्वस्वकुलयोगीशो गुरवे चार्पयेच्छिशुः॥ शि
ष्यस्य नाम कर्तव्यं नाथनाथ इति ब्रुवन्॥ ७९॥ पूर्णदीक्षाक्रमं देव
यस्य कस्यापि नोचरेत्॥ द्वादशाब्दं क्रमं तस्य परीक्ष्य क्रममुच्चरेत्॥
॥८०॥ पूर्णदीक्षाविधिः सम्यक् मया किंचित्प्रकाशितः॥ समासेन व
रारोहे किं भूयः श्रोतुमिच्छति॥ ८१॥ ॥इति श्रीपरानंदतंत्रे पूर्णदी
क्षाक्रमो नाम षोडशो दृकः॥ १६॥ ॥श्रीदेव्युवाच॥ ॥देवदेव म

हादेवकरुणामृतवारिधे ॥ पूर्णदीक्षाभियुक्तेन कर्त्तव्यं तु महात्म
नो ॥ १ ॥ अनुष्ठानं तु वद मे किं कार्यं करुणानिधे ॥ तस्य किं दीयतां दे
व यदि तेस्मि कृपा मयि ॥ २ ॥ ईश्वर उ० ॥ शृणु देवी प्रवक्ष्यामि त्वया
यत्पृष्टमादरात् ॥ तदनुष्ठानमात्रेण आवयोः संगतिर्भवेत् ॥
॥ ३ ॥ प्रकाशविमर्शाकारं त्वमेव भवतः प्रिये ॥ मेलनेचावयोर्मूर्ध्नि
वाग्भवे पादुकावली ॥ ४ ॥ तस्मादेवाभिदास्याम्यतेये वचनं संस्राय: ॥
गुप्ताद्गुप्ततरं शैवं रहस्यमिति कीर्त्तितं ॥ ५ ॥ रहस्यातिरहस्यानां र

१५

हस्यं कुलमिष्यते ॥ कुलेषु चतुराम्नाय रहस्यमिति कीर्त्तिता: ॥ ६ ॥ ते
षामपि कुले त्वानि गुप्तमूर्ध्वमिति स्मृतं ॥ ऊर्ध्वाम्नायमिति प्रोक्तं त
स्माद्गुरुतरं प्रिये ॥ ७ ॥ कथितं शृणु देवेशि त्वमेव मिदमादरात् ॥ कौ
लाचारेण युक्ताय स्वशिष्यायेदमर्पयेत् ॥ ८ ॥ पूर्णाभिषेकयुक्ताय
गुरुभक्तियुताय च ॥ भयाद्वा धनलोभाद्वा स्नेहाद्वा कथितायदि ॥ ९ ॥
अन्यशिष्याय कथितास्यान्महापातकी ध्रुवं ॥ पूर्णस्नायीप्रभाते तु
कमूलेषु च संस्मरन् ॥ १० ॥ दीपमात्मानमागम्य बटुके कुलनायिके ॥

कलशोजलमाहृत्य मलमूत्राणि शोधयेत्॥११॥ ऊर्ध्वतंत्रानुसारेण सं

ध्यावंदनमाचरेत्॥गुरुः सम्यक् लोपदिष्टानां मंत्राणां जपमाचरेत्॥१२॥

मधुरस्मितां मदारुणनयनां मातंगकुंभवक्षोजां॥

चंद्रावतंसिनीं त्वां सविधे पश्यंति सुकृतिनः केचित्॥१॥

१६